४

शाखायाः पर्णानि पतन्ति। मक्षिकाः पुष्पेभ्यः मधु पिबन्ति।

बीजात् अङ्कुरः प्ररोहति। पात्रात् जलं स्रवति।

धेनुः व्याघ्रात् त्रस्यति। अहं पीठात् उत्तिष्ठामि। त्वं तरोः अवरोहसि।

पर्वतात् नदी प्रवहति। धनिकाः ग्रामात् नगरम् गच्छन्ति।

समुद्रात् जनाः रत्नानि आनयन्ति।

दुहिता भर्तुः गृहं गच्छति। माता दुहितुः शिशुं लालयति।

शिशवः मातॄणां गानेन तुष्यन्ति। पत्नी पत्युः आज्ञाम् अनुसरति।

पुत्रः पितुः आज्ञया जामातुः गृहात् स्वसारम् आनयति।

वयं शकटस्य शब्दम् आकर्णयामः। यूयं धेनोः क्षीरं पिबथ।